श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ शृङ्गारपद्धतिः दशमी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ शृङ्गारपद्धतिः दशमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

शौरेः शृङ्गारचेष्टानां प्रसूतिं पादुकां भजे।
यामेष भुङ्क्ते शुद्धान्तात् पूर्वं पश्चादपि प्रभुः॥ १०.१ ॥

प्रणतत्रिदशेन्द्रमौळिमाला
    मकरन्दार्द्रपरागपङ्किलेन।
अनुलिम्पति पादुके ! स्वयं त्वाम्
    अनुरूपेण पदेन रङ्गनाथः॥ १०.२ ॥

अबदातहिमांशुकानुषक्तं
    पदरक्षे ! त्वयि रङ्गिणः कदाचित्।
किमपि स्थितमद्वितीयमाल्यं
    विरलावस्थितमौक्तिकं स्मरामि॥ १०.३ ॥

असहायगृहीतरङ्गनाथां
    अवरोधाङ्गणसीम्नि पादुके ! त्वाम्।
सुदृशः स्वयम् अर्चयन्ति दूरात्
    अवतंसोत्पलवासितैरपाङ्गैः॥ १०.४ ॥

निर्विश्यमानमपि नूतनसन्निवेशं
    कैवल्यकल्पितविभूषणकायकान्तिम्।
कालेषु निर्विशसि रङ्गयुवानम् एका
    शृङ्गारनित्यरसिकं मणिपादरक्षे !॥ १०.५ ॥

निद्रायितस्य कमितुर्मणिपादुके ! त्वं
    पर्यङ्किकापरिसरं प्रतिपद्यमाना।

श्वासानिलप्रचलितेन भजस्यमीक्ष्णं
नाभीसरोजरजसा नवमङ्गरागम्॥ १०.६ ॥

शयितवति रजन्यां पादुके ! रङ्गबन्धौ
चरणकमलपार्श्वे सादरं वर्तसे त्वम्।
फणिपतिशयनीयादुत्थितस्य प्रभाते
प्रथमनयनपातं पावनं प्राप्तुकामा॥ १०.७ ॥

चरणकमलसङ्गाद्रङ्गनाथस्य नित्यं
निगमपरिमळं त्वं पादुके ! निर्वमन्ती।
नियतमतिशयाना वर्तसे सावरोधं
हृदयमधिवसन्तीं मालिकां वैजयन्तीम्॥ १०.८ ॥

उपनिषदबलाभिर्नित्यमुत्तंसनीयं
किमपि जलधिकन्याहस्तसंवाहनार्हम्।
तव तु चरणरक्षे ! देवि लीलारविन्दं
चरणसरसिजं तच्चारु चाणूरहन्तुः॥ १०.९ ॥

अखिलान्तःपुरवारेष्वनेकवारं पदावनि ! स्वैरम्।
अनुभवति रङ्गनाथो विहारविक्रान्तिसहचरीं भवतीम्॥ १०.१० ॥

॥ इति श्रीपादुकासहस्रे शृङ्गारपद्धतिः दशमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥